National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2024; 1(55): 224-227
© 2024 NJHSR
www.sanskritarticle.com

काण्डूरि आर्या
शोधच्छात्रः,
श्री वेंकटेश्वर वैदिक विश्विद्यालय,
तिरुपति:

Correspondence:
काण्डूरि आर्या
शोधच्छात्रः,
श्री वेंकटेश्वर वैदिक विश्विद्यालय,
तिरुपति:

# स्वतन्त्रलक्ष्म्याः परिवारकल्पनम्

काण्डूरि आर्या

स्वतन्त्रलक्ष्मीः एकैव प्रत्येकालये प्रतिष्ठिता भवति इति नारायण बिम्बप्रतिष्ठा क्रमः सर्वोऽपि अत्र अनुसरणीयः।

**स्वतन्त्रस्थापना**

तृतीय गोपुरद्वारे दक्षिणभागे जया, उत्तरभागे विजया चतुर्थद्वारे दक्षिणभागे विभीषिका सव्यभागे शाङ्करी प्रतिष्ठाप्याः। पञ्चमावरणे लक्ष्म्याः अभिमुखः गरुडः स्थापनीयाः। ईशान्यां दिशी ह्रीमती स्थापनीया। प्राच्यादि द्वारशाखासु वनमालिका, शची, बलाकिनी कमलनायिका, विभीषिका, शीतला, शाङ्करी, सम्पद्देवी इति देव्यः स्थापनीयाः। द्वारकुम्भेषु अष्टसु पताकासु त्रय्याः आरभ्य प्रदक्षिण क्रमेण ज्येष्ठा, विद्या, श्रद्धा, कान्तिः, सृष्टिः, क्रिया, क्षमा, जया इति देव्यः पूजनीयाः। सर्वाः परिवारदेव्यः चतुर्हस्ताः शंखचक्र अञ्जलिधराश्च पद्मासनासीनाः भवन्ति। विजयां चक्रमध्ये ऋगादीन् द्वारमध्ये पूजयेत्।

**स्वतन्त्रायाः आराधनविधिः**

अष्टसु कुम्भेषु लक्ष्मीः, कीर्तिः, जया, माया, शक्तिः, विभूतिः, इच्छा, प्रीतिः इति देवताः आराध्याः पूर्ववत् नवमे कलशे रतिः भवति। मध्यकुम्भे माया, धीः, महिमा, श्रीः, इत्येताः याज्याः। करके विजयादेवी पूजनीया। पद्मबन्धस्य द्वादश दलेषु श्रीः, वागीश्वरी, कान्तिः, क्रिया, शक्तिः, विभूतिका, इच्छा, प्रीतिः, रतिः, माया, धीः, महिमा इति द्वादश देव्यः पूजनीयाः। मण्डलाभिमुख स्थिते चण्डी प्रचण्डी देव्यौ यजनीये। ईशान्यांदिशि तर्जनीमुद्रया अन्वितां ह्रीमतीं ध्यायेत्। आग्नेयादि कोणेषु वसुधा, नरकेसरी, वारुणी, विद्या इत्येताः पूजनीयाः। एताः देव्यः सर्वाः श्रियः मुखरूपाः, अतः ताः सर्वाः लक्ष्म्याः अभिमुखं स्थापनीयाः। उपकुम्भेषु अपि पूर्वोक्तानां देवीनामप्यावाहनं कार्यम्। एवं स्वतन्त्रलक्ष्म्याः परिवारकल्पनं परिवारदेवतानां स्थापन क्रमः पूजा विधिश्च श्रीप्रश्नसंहितायां पञ्चविंशे अध्याये अष्टादशभिः (25 / 5 to 23) श्लोकैः वर्णितम्।

**पारतन्त्रे विधिरयं स्वतन्त्रे शृणु वल्लभे।**
**तृतीयगोपुरद्वारदक्षिणोत्तर भागयोः।।**
**जयां च विजयां चैव चतुर्थद्वारपार्श्वयोः।**
**विभीषिकां शाङ्करीं च पञ्चमावरणे ततः।।**
**कमलाभिमुखं तार्क्ष्यमैशान्यां दिशि ह्रीमतीम्।**
**यागशालादिकाः सर्वाः पूर्ववत् परिकल्प्य च।।**
**प्राच्यादिद्वारशाखासु चिन्तेयद्वनमालिकाम्।**
**शचीं बलाकिनीं कालनायिकां च विभीषिकाम्।।**
**शीतलां शाङ्करीं सम्पद्देवीं च तदनन्तरम्।**
**ज्येष्ठां विद्यां तथा श्रद्धां कान्तिं सृष्टिं क्रियां क्षमाम्।।**
**जयां च द्वारकुम्भेषु पताकास्वष्टसु क्रमात्।**
**धृतिं लज्जां च सावित्रीं मायां शुद्धिं च तुष्टिकाम्।।**
**शान्तिं कीर्तिं यजेदेताश्चतुर्हस्ताः सुशोभनाः।**
**चक्रशङ्खाञ्जलिधराश्थासीनाः पद्मविष्टरा।।**

**श्रियादीनां तथान्येषां कुर्याद्देशिकसत्तमः।**
**अत्रानुक्तं च सकलं पूर्वोक्त विधिवच्चरेत्।।**
**वीरलक्ष्मीमित्थमेव प्रतिष्ठाप्यार्चनं चरेत्।**
**प्रत्यब्दमुत्सवं कुर्याद्विवाहोत्सव पूर्वकम्।।**[1]

**स्वतन्त्रवीरलक्ष्म्याः स्थापनम् पूजनं च**

श्री पाञ्चरात्रदिव्यागमाचार्येण आगमविद्यानिधिना श्रीमता दिट्टकवि-नरसिंहाचार्येण गुरूपरम्परया अधिगतः वीरलक्ष्मी आराधनक्रमः प्रतिष्ठाक्रमः च, "शरन्नवरात्रवैभव" नामके स्वग्रन्थे विस्तरेण उपवर्णितः। आगमज्ञानां स्मृतिशीले ग्रन्थस्थ विषयादपि प्रमाणमिति आर्षं वचनमनुसृत्य तैः उक्तः क्रमः यथा मूलमुदाह्रियते। श्री स्वतन्त्रवीरलक्ष्म्याराधनम् – "श्री फणिपुरं रङ्गस्वामिभट्टाचार्य स्वामि प्रसादितम्"

**नमस्ते सिन्धु सम्भूते नमस्ते पद्मसम्भवे।**
**नमस्सरोरुहावासे नारायणकुटुम्बिनी।।**[2]

अयं देशिकः कृताह्निकः श्री मन्दिरमासाद्य पाणि, पादं प्रक्षाल्य, द्विराचम्याष्टांगं प्रणम्य द्वार पार्श्वं गत्वा, ज्ञानादि मन्त्रषट्केन षडंगन्यासं तालत्रयं च कृत्वा, वायु मन्त्रेण कवाटमुद्घाट्य, देवव्रतेन साम्ना, अन्तः प्रविश्य प्रणवेन नित्यदीपान् प्रदीप्य, श्री गात्रान्निर्माल्यान्यपनीय तैस्सुमुखीमलंकृत्य, प्रणम्य, गर्भगेहमर्घ्य-पात्रादीनि च विशोध्य, उशीरवंशकूर्चेन श्रीमन्त्रेण श्रीगात्रं सम्मृज्य, तेनैव मन्त्रेण गन्धोदकेन संक्षाल्य, प्रोतेनांगांबु निर्हृत्य, धौतवस्त्र आदिना प्रसाद्य, गन्ध पुष्प धूप दीपैर्गर्भमन्दिरद्वार, दक्षिण, वामपार्श्वयोः ओं चण्ड्यैनमः ओं प्रचण्डयै नमः मुखमण्टपद्वारे तथैव ओं बलाकिन्यै नमः ओं, वनमालिन्यै नमः, विमाने – ओं विष्णवे प्रसादरूपिणे हूँ षट् स्वाहा, विमानस्य चतुर्दिक्षु ओं तुष्ट्यैनमः, ओंपुष्दयै नमः ओं सावित्र्यैनमः ओं वाग्देव्यैनमः आग्नेयादि कोणेषु ओं वैनतेयाय नमः, प्रथमावरणे – सोमेऽशानान्तरे ओं सुमुख्यै नमः, मुखमण्डपस्य पुरतः, ओं – ताक्ष्र्याय नमः इति परिचर्यावरैरन्यैर्वा। परिवारार्चने कृते श्री पार्श्वे सव्येतरे स्वापने स्वस्तिकासनेन वोपश्य। बहिस्तूर्यादिवाद्य घोषे प्रवर्तिते तिरस्करण्या द्वारं निच्छिद्र-माच्छाद्य। अस्त्रमन्त्रेण अस्त्रमुद्रया दिग्बन्धनं कृत्वा आत्मनः परितः तेजोऽग्नि प्रकार मन्त्राभ्यामग्निप्राकारमाच्छाय, सुदर्शन मन्त्रेणाऽ-काशे चक्र मुद्रांप्रदर्श्य प्राणायाम त्रयं कृत्वा, शोषणाऽदिपूर्वकं तत्त्वसंहारोत्पादने विधाय अस्त्र मन्त्रेण करौ विशोध्य, ओं-ओं-ओं-श्रीं-ओं-ओं-ह्रीं-ओं-ओं-श्रीं-ओं-ओं-स्वाम्-ओं-ओं-हां = ओं – इति सृष्टिस्थितिः संहार प्रकारेण करांगुलिषु हृदयाद्यस्त्र मन्त्रै रङ्गुष्ठादि कनिष्ठान्तं – ओं – तेजसे षड् इति। अस्त्र मन्त्रेण – नख, मुखेषु – ओं आदित्य प्रतिमाय माया रूपिणे हूँ फट् स्वाहेति पद्यमन्त्रेण करतलयोः एवं करन्यासं, सृष्ट्यादिना विना, ओं-ओं-नमित्यादि प्रकारेण मन्त्र वर्णैरेव हृदयादिषडंगन्यासं, पुनः हृदयाद्यंग मन्त्रन्यासं च कृत्वा, पद्ममन्त्रेण पद्ममुद्रां बध्वा, लक्ष्मीतादात्म्य-मात्मन्यनुसन्धाय,गन्धाऽदिचतुर्भिस्तत्तन्नामभिः। प्रणवादि नमोऽन्तै-रहविन्यस्त मन्त्रानभ्यर्च्य, मानसयागं कुर्यात्। योगसंपुटमुद्रां बध्वा अक्षग्रामं मनस्युपरन्तं कृत्वा, मनः बुद्धौ, बुद्धिं-ज्ञानं गोचरे श्रियि निक्षिप्य हृदये योगासनमनुचिन्त्य शशिसूर्याख्य, कमलद्वय सम्पुटस्थ वाग् भ्रमरीनादावसान गगनवर्ती भगवच्छ्रीवत्सात्, ओं-ओं-ह्रीं-ह्रीं-परमधामावस्थिते मदनुग्रहाभियोगोद्यतावतारे इहाभिमतं सिद्धिदे मन्त्रशरीरे ओं-ह्रीं-नमो नमः। इति मन्त्रेण योगासनाब्जे।

**श्रियमावाहयामि –**

पद्मासनेनोपविष्टां पुल्लपद्मोरामान, लाटिकां, प्रबुद्धोत्पलविस्तीर्ण-लोचनां सुस्मिताननां कटाक्षैः करूणपूर्णैर्जगदाप्यायकारिणीं, दर्पणोदरसंकाश विलसद्गण्डमण्डलां। प्रस्फुरन्नासिकावंश मौक्तिकां, भ्रमालतोऽज्वलां मुक्ताफलाभ रदनां विलसदिवद्रुमाधरां, रत्नताटंकविलसत्कर्णद्वय मनोहरां, पूर्णचन्द्रप्रतीकाश वदनां, कम्बुकन्धरां रत्नग्रवैयकोपेतां, मांगल्यमणि भूषितां, चतुर्भुजां, पीवरांसां मुक्ताहारैश्च भूषितां, विचित्र कञ्चुकेनाढ्यां, नानाभूषविभूषितां, मुख्य दक्षिणहस्तेन भीतानामभयप्रदां, सव्येन पाणि पद्मेन श्रितानां दरदायिनीं "पश्चाद्दक्षिणहस्तेन पद्मकुड्नल-धारिणीं, तथाविधेन वामेन दधाना पुल्लपङ्कजाम्"। मणिकङ्कण केयूर नानारत्नांगुलीयकैः मण्डितां द्विव्यगन्धानुलिटताङ्गीं, पूर्णेंद्वयुत तुल्याभां, सौन्दर्यामृतवारिधिं एवं ध्यात्वा नभस्थ सहस्रदलमण्डित पुण्डरीकाद् ब्रह्मरन्ध्रेण हृदयालय श्रीमूर्ध्नि निपतिता गङ्गामृतेन अर्ध्य, पाद्य आचमनीयानि संकल्प्य, संकल्पसिद्धेरमृतमयैरंबरात् पतद्भिस्सांस्पर्शकादिलक्षणैः भोगैः श्रियं मुदितामनुचिन्त्य भोगदानमन्त्रेण मनसार्घ्यं समर्प्य, सन्निधि सन्निरोध, साम्मुख्यानि तत्तन् मुद्रादर्शनपूर्वकं प्रार्थ्य। स्वदेहवद् श्रियं श्री मन्त्रांग मन्त्रन्यासौ कृत्वा भोगदानमन्त्रेणार्घ्य, पाद्याचमन पुष्पमाल्यानुलेपन, धूप, दीप समर्पण अष्टाङ्ग प्रणामान्। जयघोषान् सादरं मनसा कृत्वा।

**स्वागतं तव पद्माक्षि सन्निधिं भजेमेऽम्बुजे।**
**गृहाण मानसीं पूजां यथार्थ परिभावितामिति।**

विज्ञाय, सुप्रसन्नां प्रसादाभिमुखीं, श्रीं विज्ञाय, श्रीं सुगन्धतैले नाभ्यज्य उद्वर्तनपूर्वकं गन्धोदकेन संस्नाप्य धौतवस्त्रेणाङ्गाम्बु-निर्हृत्य। सुवस्त्र आदि सुरभिमुद्रा दर्शनान्तं कृत्वा। अञ्जलिं सौवर्ण पुष्पैः सम्पूर्य, तत्र वह्न्यार्केन्दुशतप्रभां श्रियं श्रीमन्त्रेणावाह्य तमञ्जलिं श्रीमूर्ध्नि प्रक्षिप्यार्घ्यं समर्प्य पुनः पुष्पाञ्जलि मन्त्रेण पादयोः प्रकीर्य, स घण्टानादं, संख्याहीनं यथाशक्ति श्रीमन्त्रं जपेत् भगवदाराधनोक्त पात्रपरिकल्पनादि योगासनकल्पनान्तं कृत्वा, बहुबेरे परमव्योमस्थ भगवत् श्रीवत्सात् पूर्वोक्तावाहन मन्त्रेण हिरण्यवर्णां इति ऋचा च यथाविध्यावाहनं एकबेरेतु सुगन्धलिप्त-मञ्जलिं पुष्पैः सम्पूर्य। तमञ्जलिं पूर्वोक्तावाहन मन्त्राभ्यां बिम्बमूर्ध्नि प्रक्षिप्य।

**साम्मुख्यं कुरूकल्याणि सर्वदा सर्व कामदे।**
**द्रव्य मन्त्र क्रिया भक्ति श्रद्धाहानिं सहस्व मे।।** इति

सम्मुखी मुद्रादर्शनपूर्वकं प्रार्थ्य प्रतिमामुद्रां सन्निधि, सन्निरोध, संस्तम्भ, स्थापनमुद्राश्च दर्शयित्वा। पूर्ववत् लक्ष्मीं ध्यात्वा बिम्बे

करन्यासं विना श्रीमन्त्रन्यासं अङ्ग मन्त्रन्यासं च कृत्वा, कमलमुद्रां प्रदर्श्य, पुष्पाञ्जलि मन्त्रेण पुष्पांजलिं समर्प्य –

**क्षीरोदतनये देवि! वासुदेव प्रियेऽम्बुजे।**

**त्वां भक्त्या पूजयामद्य भोगैरर्ध्यादिभिः क्रमात्।।**

इति विज्ञाप्य, लब्धाज्ञः, ताम्म अवः + पुरुषानहं इत्यासनं, अश्वपूर्वां रथमध्यां + जुषतां इति, मूर्ध्नि त्रिवारमर्घ्यं, तेनैव मन्त्रेण पादयोः द्विवारं पाद्यं कांसोस्मितां + श्रियं इति त्रिवारमाचमनं समर्प्य, चन्द्रां प्रभासां + वृणे इति फलाद्युपहारान्, आर्द्रां पुष्पकरिणी + ममावह इति दधि, मधु, मधुपर्कं निवेद्य, परिवारानर्चयेत्। योगासनाब्ज प्रागादि दल चतुष्टये ओं वासुदेवाय नमः, ओं संकर्षणाय नमः, ओं प्रद्युम्नाय नमः, ओं अनिरुद्धाय नमः, ओं आग्नेयादि दल चतुष्टये, ओं गुग्गुलाय नमः, ओं कुरुण्डाय नमः, ओं दमकायनमः, ओं शललाय नमः, दलानां बाह्यतः, प्रागादिक्रमेण ओं रत्यै नमः, ओं सरस्वत्यै नमः, ओं भूम्यै नमः, ओं प्रीत्यै नमः, ओं कीर्त्यै नमः, ओं शान्त्यै नमः, ओं पुष्टयै नमः, ओं तुष्टयै नमः, दक्षिण पार्श्वे, ओं पद्मनिधये नमः, वामे ओं शंख निधये नमः, पुनः प्रागादितः। ओं भ्नं, धनदाय नमः, ओं ग्लां माणि भद्राय नमः, ओं जृम् जृम्भलाय नमः, ओं न्रीम् नलकूबराय नमः, ओं प्लूम् पूर्णाय नमः, ओं च्लूम् – चलेन्द्राय नमः, ओं क्लूम्-कलिसृजे नमः, ओं चूलाम् – शिबि कुण्डलाय नमः, दक्षिणपार्श्वे ओं – श्रूम् – बलायै नमः।

द्वितीयावरणे – ओं इन्द्राय नमः, ओं अग्नये नमः, ओं यमाय नमः, ओं नैर्ऋतये नमः, ओं वरुणाय नमः, ओं वायवे नमः, ओं सोमाय नमः, ओं ईशाय नमः।

तृतीयावरण – प्रागादि दिक् चतुष्टये ओं बलाकिन्यै नमः, ओं – वनमालिन्यै नमः, ओं विभीषिण्यै नमः, ओं शाङ्कर्यै नमः, तुरीयावरण ऐशान्ये ओं पुष्पधारिण्यै नमः, प्रथमाऽदि तृतीयान्त-वरण द्वारपार्श्वेषु क्रमेण ओं सन्तानाय नमः, ओं मन्दराय नमः, ओं बिल्वाय नमः, तुरीयावरणे परितः, ओं दिव्यसदस्यै नमः, इति शतपत्रसमाकुलं पक्षि संघातालिकुलस्वन मनोरमां सरसींच, गन्ध, पुष्प, धूप, दीपैः संपूजयेत्। इतिमन्त्रासनम् अथस्नानासनम् – श्रियः पादौ व्यत्यस्तहस्ताभ्यां गृहीत्वा,

**स्फुटीकृतं मयादेवी इदं स्नानासनं महत्।**

**आसादयाशु स्नानार्थं मदनुग्रहकाम्यया।।**

इति प्रार्थ्य स्नानबेरं सन्निधाप्य। तत्र मूलबेरस्थ शक्त्येकदेशमावाह्य भोगदानमन्त्रेण पादुके समर्प्य इदं विष्णुः + सुरे त्रीणिपदा + धारयन् इति पादुकारोहणं विज्ञाय। उत्तिष्ठ ब्रह्मणस्पत + न इति साधकैः साकं स्नानबिम्बमुद्धृत्य भद्रं कर्णेभिः + यदायुः इत्यर्धमण्डपस्थ स्नानपीठं गमयित्वा। अशक्तौ – भगवच्छेषेण घृतारोपणं कृत्वा, अर्घ्य, पाद्याचमनीयानि समर्प्य, तद्विष्णोः परमंपदं + ततं – इति दन्तधावनम्, तद्विप्रास पदं इति जिह्वानिर्लेखनं कृत्वा, भोगदानमन्त्रेण आचमनोदकेन गण्डूषं समर्प्य, श्री गायत्र्या तेनैवोदकेन मुखं संप्रक्ष्याल्य। वस्त्रेण मुखं संमृज्य स्नानशाटिकां समर्प्य मुखवासं समर्प्य, तैलसमर्पणादि सहस्रधारा स्नान प्रार्थनान्तोविधिस्समानः। अशक्तौ भगवत्स्नान-शेषेणैव स्नानं विष्णुगायत्रीत्यत्र श्री गायत्री प्रार्थनायां देवेतन्त्र लिंग परिणामः श्रीसूक्तेन सहस्रधारया, कुम्भेन वा स्नाननम्यत्समानं, इति स्नानासनं मूलबिम्बं उपैतुमां + ददातु मे इति धौत वस्त्रेणालंकृत्वा आचमनीयं समर्प्य –

**देवदेवप्रिये देवि सर्वभूतहृदिस्थिते।**

**अलंकारासनं हृद्यं समाश्रय हितागमे।।**

इति प्रार्थ्य। पादुके समर्प्य। अलंकारासने सुखासीनां मत्वा अर्घ्य पाद्याचमनानि समर्प्य, मूर्धानन्दिव इत्यगरूधूपेन कशान विशेष्य। गन्धद्वारां + श्रियमिति चन्दनेनाऽलिप्य क्षुत्पिपासा + गृहात् इति रत्नमकुट, हाराङ्गदवलय, मेखला, दाम, मञ्जरि रत्नतिलकादि भूषणैः मनसः काम + श्रयतां यशः इति। मूलाभिश्च श्रियं भूषयित्वा। श्री गायत्र्या नयनयो रञ्जनं समर्प्य व्याहृत्यादर्पणं प्रदर्श्य। कर्दमेन + मालिनीमितिधूपं, आपस्सृजन्तु + मे कुले इति दीपं। नीराजनं च समर्प्य, सोमं राजानमिति मात्रां सोऽदकमाचार्याय, प्रतिपद्य यवनिकामपनीय। तूर्यादि वाद्यान्यघोष नृत्त, गीत, स्तोत्रादिभिः श्रियं परितोष्य

**क्षीरोदतनये देवि कमल पद्मसम्भवे।**

**भोज्यासनमुपागम्यह्यतुलां प्रीतिमाश्रये।।** इति प्रार्थ्य।

देवीं भोज्यासनस्थां विभाव्य अर्द्रांयः करणीं + ममावहेति यथा विध्यभ्यवहारिकान्निवेद्य कृतांजलिः, विनयावनतः देविभक्त्यासी-तिपृष्ट्या ताम्बूलं तारिकया निवेदयेत्। इति भोज्यासनं, ताम्म आवह + नहं इति प्रणव्योत्थाय बद्धाञ्जलिः। नमामि देवि लोकानां जनयित्र्यब्जसम्भवे इतिसुत्या श्री मन्त्रं जपेत्। स्वासनेसमुपविश्य, त्रिः प्राणानायम्य, देश कालौ, संकीर्त्य श्री समाराधनां-गं श्रीमन्त्रजपं करिष्ये इति संकल्प्य। मूर्ध्नि ओं अंकणायनमः मुखे ओं गायत्र्यै नमः हृदये ओं श्रियै नमः। इति ऋष्यादिन्यासं (प्राग्वत् करन्यासं) ओं, ओं नमः शिरसि, ओं श्रीं नमः, शिखायां, ओं ह्रीं नमः, बाह्योः – ओं श्रीं नमः नेत्रयोः, ओं स्वां नमः, शिरः परितः, ओं हां नमः, इति षडंगन्यासंचकृत्वा, ओं रां नमः परायकालानलात्मने इति अग्निप्राकारमन्त्रेण दिग्बन्धनं कृत्वा,

**पद्मगर्भ निभां कान्तामसितायतलोचनाम्।**

**स्फुरत्कटककेयूरहारकुण्डलमण्डिताम्।।**

**गम्भीर नाभि त्रिवलि विभूषित तनूदराम्।**

**सुकर्कश दृढोत्तुङ्ग पीनावृत्त घनस्तनीम्।।**

**चरद्विरेफपटल समाक्रान्तालकावलिम्।**

**आरक्ताधरबिम्बा च वंशमुक्ताफल द्विजाम्।।**

**अर्धचन्द्र ललाटस्य राजमान ललाटिकाम्।**

**सर्वलक्षणसम्पन्नां कृष्णाकुञ्छित मूर्धजाम्।**
**विष्णुवामभुजाश्लिष्टां तदन्तस्थ कराम्बुजाम्।**
**वामेन बाहूना दिव्यां वहन्ती पुष्पमञ्जरीम्।।**[3]

अर्धस्वस्तिक संलीनां ध्यायामि हरिवल्लभाम्। इति ध्यात्वा, चक्रमुद्रां पद्ममुद्रां च प्रदर्श्य, अष्टोत्तरशतम् अष्टाविंशतिमष्टौ वा यथाशक्ति जप्त्वा, प्रणवेन जपम् उपसंहृत्य सपुष्पमुदकमादाय

**पुण्डरीकाक्षदयिते मन्त्रमूर्ते सनातनि।**
**गृहाणास्मिन्जपं देवि ममदीनस्य शाश्वते।।**

इति श्री मन्त्र सहितं श्रियः पुरतोविसृज्य। स्वासन मन्त्रेण प्रोक्ष्य – यथाविधिकारि प्रदानं कुर्यात्।

**उपयुक्तग्रन्थसूची**

1. श्रीप्रश्नसंहिता – राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपतिः – 2006.
2. श्रीस्वतन्त्र वीरलक्ष्मी (आन्ध्रभाषायां) – श्री दिदृतवि लक्ष्मीनर-सिंहाचार्यः, श्रीपाञ्चरात्र दिव्यागम परिषत्, गुण्टूर् – 2013.
3. वैय्याकरणसिद्धान्तलघुमञ्जूषा – चौखाम्बा संस्कृत सिरीज्, वारणासी – 1973.
4. अमरूकशतकम् – चौखाम्बा संस्कृत विद्यालय, वारणासी – 1985.
5. लक्ष्मीतन्त्रम् – The Adyar Library and Research Centre, Adayar, Chennai, India – 2000.

**संदर्भाः**

1 श्रीप्रश्नसंहिता – 25/5 to 11, 22, 23 श्लोकाः, Page No. 219, 220.

2 श्री स्वतन्त्रवीरलक्ष्मी – by दिट्टकवि नरसिंहाचार्यः, Page No. 66 to 71, 166 to 169.

3 श्री स्वतन्त्रवीरलक्ष्मी – Page No. 70, 71 by दिट्टकवि नरसिंहाचार्यः.